# अहिंसा परमो धर्मः इति मन्वाचार्योक्तवाक्यस्य महाभारतानुगुण्यविमर्शः

**Indrani Mandal**
Assistant Professor of Sanskrit, Krishnagar Women's College, Nadia, W.B, India

## सारांश

सर्वेषां मनुष्याणाम् एका उचितकर्तव्या "अहिंसा" भवतीति विषये कोऽपि संशयः एव नास्ति। शास्त्रेषु उक्तं यत् 'अहिंसा परमो धर्मः' इति। किन्तु परिवारेषु समाजेषु तथा देशे प्रविश्य दुष्कृतिभिः आततायिभिः यदि अत्याचारः, प्राणनाशः, जनन्यः दुहितॄन् स्त्रीजातीन् प्रति असम्मानं च क्रियते तर्हि तत्र अहिंसा परमो धर्मः इति शास्त्रवचनानुसारेण उपस्थितैः कार्यकतृभिः आरक्षकैः तुष्णीं भूत्वा अहिंसा एव आचरणीया वा? कदापि न, वरं तस्यां परिस्थितौ अहिंसां परित्यज्य हिंसा एव उचितकर्तव्या इति प्रतिभाति। तस्यां परिस्थितौ सः एव धर्मः। महाभारतशास्त्रस्य विविधोपाख्याने अहिंसा परमो धर्मः इति पालनीयधर्मरूपेण मनूक्तस्य शास्त्रवचनस्य विचारः दृश्यते। सर्वस्यां परिस्थितौ अहिंसा उचितकर्तव्या भवितुं नार्हति, क्वचित् हिंसापि धर्मरूपेण आचरणीया भवति। अहिंसा परमो धर्मः शास्त्रेण यथा उक्तः तथा कस्यांश्चित् परिस्थितौ हिंसापि औचित्यमावहति इत्यपि शास्त्रेण प्रतिपाद्यते। अतः क्वचित् एकस्यां परिस्थितौ हिंसाऽहिंसयोः द्वयोः कर्तव्ययोः एकत्र उपस्थितौ किं करणीयं किंवा अकरणीयमिति विषये संशयः जायते। तदा तस्मिन् समये आत्मानात्मविवेकवान् अखण्डचैतन्ये स्थिरबुद्धिः पुरुषः उचितकर्तव्यं निर्णीय तत्कर्तव्यपालने समर्थः भवतीति महाभारतीयः विचारणीयः सिद्धान्तः भवति। अतः परिवाररक्षार्थं समाजरक्षार्थं तथा देशरक्षार्थं लोककल्याणार्थं च उचितकर्तव्यस्य पालनाद् आत्मानात्मविवेकवान् अखण्डचैतन्ये स्थितबुद्धिसम्पन्नः पुरुषः भवेत् । सम्प्रति सन्त्रासवादिनः आतङ्कवादिनः सहसा भीतिप्रसारणेन प्राणनाशेन लुण्ठनेन च सर्वान् जीवान् विभीषयन्ति। अस्यां स्थितौ जनाः आत्मानम् असुरक्षितम् अनुभवन्ति। अहिंसा परमो धर्मः इति नैतिककर्तव्यं खण्डितं जायते। एतस्यां भयावहपरिस्थितौ अहिंसा परमो धर्मः इति मन्वाचार्योक्तिः महाभारतानुगुण्येन विचारणीयः उपदेशः हि सर्वेषां मार्गदर्शनं करिष्यति।

**मुख्य शब्द -** कर्तव्यः, धर्मः, संशयः, अहिंसा, हिंसा, आत्मानात्मज्ञानम्।

## मूल आलेख

अस्माकं किं तावत् कर्तव्यं किं न हि करणीयमिति विषयः शास्त्रात् ज्ञायते। तत्र शास्त्रमेव प्रमाणं भवति। भगवता श्रीकृष्णेन उक्तं श्रीमद्भगवद्गीतायाः षोडशऽध्याये यत्

यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ इति।

मनुसंहितायां स्मृतिशास्त्रे मनुना चतुर्वर्णेभ्यः सर्वेभ्यः मनुष्येभ्यः अहिंसा सत्यम् अस्तेयम् शौचम् इन्द्रियनिग्रहः इति चतुर्विधः धर्मः उपदिष्टः। मनुसंहितायाः दशमोऽध्याये उक्तं यत्

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥ इति।

महाभारतस्य आदिपर्वणि वनपर्वणि अपि च उक्तं यत् "अहिंसा परमो धर्मः सर्वप्राणभृतां वरम्" "अहिंसा सत्यवचनं सर्व्वभूतहितं परम्" इति। किन्तु प्रश्नः उदेति यत् सर्वस्यां परिस्थितौ अहिंसा उचितरूपेण पाल्यते वा? यदि सहसा अदृश्यत यत् अस्माकं गृहे अथवा भवत्याः भवतः वा गृहे काश्चन आततायिनः दुष्कृतयः आगत्य अस्त्रेण लुण्ठनेन धर्षणेन प्राणनाशाय उद्यताः भवन्ति तर्हि तदा आततायिनः दुष्कृतीः प्रति अहिंसा अनुष्टीयते वा? नहि परिवाररक्षार्थं तान् प्रति हिंसा एव उचितकर्तव्या भवेत्। अतः शास्त्रेणापि क्वचित् स्थले हिंसापि कर्तव्यरूपेण उपदिश्यते। मनुसंहितायाः अष्टमोऽध्याये उक्तं यत्

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥३५०॥ इति।

मनुसंहितायाः पञ्चमेऽध्याये उक्तं यत् "यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः" इति । हिंसाम् ऋते जीवनरूपेण परिदृश्यमाने जगत्यस्मिन् खाद्यखादकव्यवस्था भवितुमेव नार्हति। अतः श्रीमद्भगवद्पुराणे अपि खाद्यखादकव्यवस्थायां हिंसायाः समर्थनं प्राप्यते। श्रीमद्भगवद्पुराणे उक्तं यत् -

अहस्तानि सहस्तानामपदानि चतुष्पदाम्।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥इति॥१.१३.४७

महाभारतस्य शान्तिपर्वण्यपि उक्तं यत् "प्राणस्यान्नमिदं सर्वं जङ्गमं स्थावरं च यत्" (१५.२२) इति। श्रुत्यपि आपत्काले प्राणसङ्कटे सर्वाणि अन्नमिति अनुमोदयति। वेदव्यासेन उक्तं ब्रह्मसूत्रे यत् "सर्व्वान्नानुमितश्च प्राणात्यये तद्दर्शनात्"(३.४.२८) इति। शास्त्रे लोककल्याणार्थं युद्धे हिंसा उचितकर्तव्या भवति। श्रीभगवानुवाच श्रीमद्भगवद्गीतायाः द्वितीयेऽध्याये यत् - "धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते" इति। सुतरां दृश्यते यत् शास्त्रेण उपदिश्यते यथा अहिंसा आचरणीया तथैव परिस्थितिमनुसृत्य हिंसायाः अपि औचित्यं विद्यते। अतः अहिंसा परमो धर्मः इति पालनीयकर्तव्यस्य अपवादः जायते शास्त्रोपदिष्टायाः हिंसायाः पालनेन। पुनरपि कस्मिंश्चन क्षेत्रे शास्त्रोपदिष्टायाः हिंसायाः अपि अपवादः भवति शास्त्रोपदिष्टेन अहिंसा परमो धर्मः इति मनुकथितस्य शास्त्रवचनेन। अतः अहिंसा आचरणीया उत हिंसा कर्तव्या इति अविचार्य आवश्यकतानुसारेण पालनीया भवति। परन्तु योग्यप्रसङ्गस्य अभावे दुर्जनेन अनुष्ठितया अहिंसया परिवारे समाजे तथा देशे अराजकता अनिष्टः अशान्तिः विश्रृङ्खला च उत्पद्यते। अतः मनूक्तानां स्मृतिशास्त्रवचनानां पर्वतिनि समये विचारस्य प्रयोजनं भवति। अतः मनोः पर्वतिनि समये महाभारतस्य विविधानाम् उपाख्यानां मध्ये मनूक्तस्य स्मृतिशास्त्रवचनसमूहस्य विचारः परिदृश्यते। प्रश्नः उदीयते यत् किमर्थं विचारः दृश्यते, तत्र काश्चन युक्तिः अस्ति वा? येन युक्तिबलेन विचारं कृत्वा अहिंसाहिंसयोः योग्यप्रसङ्गस्य निर्णयः सम्भवेत्। अत्र उदीयमानस्य प्रश्नस्य अन्वेषयता मया केवलम् अहिंसा परमो धर्मः इति मनुकथितस्य शास्त्रवचनस्य महाभारतानुगुण्यविमर्शः करिष्यते।

## अहिंसा परमो धर्मः इति शास्त्रवचनस्य महाभारतानुगुण्यविमर्शः

महाभारतस्य वनपर्वणः षडधिकद्विशततमेऽध्याये सप्ताधिकद्विशततमेऽध्याये च धर्मव्याधस्य एकम् उपाख्यानमस्ति। तस्मिन्नुपाख्याने कोशिकं ब्राह्मणं प्रति धर्मव्याधेन शास्त्रोपदिष्टयोः हिंसाऽहिंसयोः उचितकरणीययोः धर्मयोः विचारः परिलक्ष्यते। अस्मिन् धर्मव्याधोपाख्याने त्रिविधं चरितं प्राप्यते। प्रथमं चरित्रं भवति कश्चन द्विजातिप्रवरः व्याकरणादिभिः च उपनिषद्भिः च सह वेदाध्यायी तपोधनः तपस्वी धर्मशीलः कौशिकः इति। द्वितीयं चरित्रं प्राप्यते सदाचारसम्पन्ना पवित्रा गृहकर्मनिपुणा परिजनहितैषिणी यशस्विनी सततसंयतेन्द्रिया देवरूपेण पतिशुश्रूषां कुर्वती साध्वी रमणी इति। तृतीयं चरित्रं भवति कश्चन मातापित्रोः शुश्रूषुः सत्यवादी जितेन्द्रियः स्वधर्मपालनकारी मांसविक्रेता मिथिलायां निवासी धर्मव्याधः इति। कौशिकः ब्राह्मणः यथार्थस्य धर्मस्य लाभाय गुरुमातापितृणां शुश्रूषाम् अकृत्वा तान् त्यक्त्वा भिक्षावृत्तिम् अवलम्ब्य अरण्ये अजीवत्। सहसा एकदा वृक्षमूले स्थितस्य वेदानुच्चारयतः कौशिकस्य ब्राह्मणस्य उपरि

तस्य वृक्षस्य उपरिष्टात् गुप्तभावेन स्थितया बलाकया पुरीषं उत्ससृष्टम्। ततः सः ब्राह्मणः क्रुद्धः सन् बलाकाम् अवेक्षेत। तेन दर्शनेन बलाका भस्मीभूता सती भूमौ पतिता। तदा निहतां बलाकां दृष्ट्वा कारुण्यादभिसन्तप्तः परिशोचन् सः द्विजः अकथयत् यत् रोषरागबलात्कृतः अहम् अकार्य्यं कृतवानस्मि। ततः सः द्विजः भैक्षाय तां साध्वीं गृहिणीं प्रति उपस्थितः सन् भिक्षां अप्रार्थयत। ततः सा साध्वी गृहिणी यदा कौशिकाय ब्राह्मणाय भिक्षादानाय भिक्षादानपात्रस्य परिष्करणे उद्यता जाता तदैव तस्याः क्षुत्सम्पीडितो भर्ता सहसा प्रविष्टः। ततः सा साध्वी पतिं दृष्ट्वैव तस्मै द्विजाय भिक्षादानोद्योगं परित्याक्तवती। ततः सा शुभेक्षणा पतिशुश्रूषां कुर्वती तदा ब्राह्मणं दृष्ट्वा तं भैक्ष्यकाङ्क्षिणं संस्थितं सम्मारथ। ततः तदा सा साध्वी भिक्षादाने विलम्बकरणाल्लज्जिता भूत्वा भिक्षामादाय विप्राय निर्जगाम। ततः साध्वी रमणी क्रोधसन्तप्तं ज्वलन्तमिव ब्राह्मणं दृष्ट्वा अनुनयपूर्वकम् अब्रवीत् यद् 'हे विद्वन्! क्षन्तुमर्हसि मे, भर्ता मे दैवतं महत्, मया शुश्रिषतः क्षुधितः श्रान्तः प्राप्तः सोऽपि' इति। ततः ब्राह्मणः उवाच यत् ब्राह्मणा न गरीयांसो त्वया पतिर्गरीयान् कृतः, त्वं वर्तन्ती गृहस्थधर्मे ब्राह्मणानवमन्यसे। ततः साध्वी रमणी द्विजं प्रति क्षमायाः प्रार्थनां कृत्वा अब्रवीत् यद् पतिशुश्रूषया यः धर्मः सः धर्मरेव मह्यं रोचते, हे ब्राह्मण पश्य पतिशुश्रूषायाः यादृशं फलं सर्वज्ञतारूपं मया लब्धेति, अतः भवता बलाका दग्धा रोषात् तद्विदितं मया इति। ततः साध्वी गृहिणी कौशिकः विप्रं प्रति "ब्राह्मणः इति कः मन्यते देवैः" एतस्मिन् विषये उपादिशत्। साध्व्याः रमण्याः कौशिकं ब्राह्मणं प्रति उपदिष्टवचनात् स्पष्टीभवति यद् अहिंसा परमो धर्मः इत्यत्र परमधर्मविषये यथार्थतया न ज्ञायते कौशिकेन। तस्मिन् कौशिके ब्राह्मणे ब्राह्मणस्य यथार्थगुणाः न विद्यन्ते अतः अहिंसा परमो धर्मः इति पालने असमर्थः भवति क्रोधाहंकाराभिभूतात्। अन्यतः साध्वी रमणी पतिशुश्रूषायाः कारणात् सर्वज्ञः भवति। सा उक्तवती यद् 'हिंसितश्च न हिंसेत तं देवा ब्राह्मणं विदुः' इति। पुनरपि सा उक्तवती यद् यस्य धर्मज्ञस्य मनस्विनः सर्वधर्मेषु चरतः अन्यः सर्वः लोकः आत्मसमः भवति तं देवा ब्राह्मणं विदुः इति। परमधर्मविषये तया उक्तं यद् दुर्ज्ञेयः शाश्वतो धर्मः अर्थात् आत्मदर्शनम् सः धर्मः च सत्ये प्रतिष्ठितः भवति। पुनरपि तया उक्तं यद् हे द्विजोत्तम! बहुधा दृश्यते धर्मः सूक्ष्म एव अर्थात् चैतन्यस्वरूपपरमात्मा भवतीति। एषा उक्तवती रमणी यथार्था साध्वी आत्मात्माज्ञानवती भवति, तस्मात् कौशिकं ब्राह्मणं परित्यज्य निर्भयेण पत्युः शुश्रूषां कुर्वती आसीत् सा। ततः सः द्विजः कौशिकः यथार्थरूपेण प्रकृतधर्मस्य अवगताय मिथिलानिवासीं मांसविक्रेतारं धर्मव्याधं प्रति अगच्छत्। ततः तत्र मार्गमाहिषमांसानि विक्रीणन्तं धर्मव्याधं दृष्ट्वा सः विप्रः चकितः अभवत्। ततः सः धर्मव्याधः कौशिकस्य सदिच्छानुसारेण तं स्वगृहं प्रति अनयत्। ततः कौशिकः ब्राह्मणः धर्मव्याधस्य प्राणिवधरूपेण घोरेण कर्मणा अनुतप्तः अभवत्। ततः तदा धर्मव्याधः अवदत् यत् कुलोचितमिदं कर्म पितृपैतामहं मम, विधात्रा विहितं पूर्वं कर्म अर्थात् प्राणिवधरूपं स्वमनुपालयनिति। ततः पुनरपि सः उवाच यत् अशीलश्चापि पुरुषो भूत्वा शीलवान् भवति सत्संसर्गात् पुनः प्राणिहिंसारतिश्चापि भवते धार्मिकः स्वधर्माचरणादिति। ततः सः धर्मव्याधः उवाच यत् कर्म चेत् किञ्चिद् अन्यत् अर्थात् हितविपरीतं स्याद् इतरत्र तदाचरेत्, यत् कल्याणमभिध्यायेद् तत्रात्मनं नियोजयेदिति। ततः सः धर्मव्याधः उवाच अहिंसा सत्यवचनं सर्व्वभूतहितं परम्, अहिंसा परमो धर्मः स च सत्ये प्रतिष्ठितः इति। ततः स पुनः उवाच सर्वभूतदयावन्तो हि अहिंसानिरताः सदा इति। ततः उवाच यत् प्रज्ञा अर्थात् तात्त्विकबुद्धिरेव प्रासादमारुह्य मुच्यन्ते महतो भयादिति। ततः सः उवाच हे ब्रह्मन्! विधिना हि हते निमित्तं घातको भवेदिति। भगवता श्रीकृष्णेनापि उक्तं यत् - 'मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्' इति। ततः श्रुत्यनुसारेण सः धर्मव्याधः उवाच यत् अन्त्राद्यभूता लोकस्य इत्यपि श्रूयते श्रुतिरिति। पुनरपि श्रुतिवचनस्य स्मरणं कृत्वा सः धर्मव्याधः उवाच यत् चातुर्मास्ये यागे पशवो वध्यन्त इति नित्यशः, अग्नयो मांसकामाश्च इत्यपि श्रूयते श्रुतिषु। हे! ब्रह्मन् यज्ञेषु पशवो वध्यन्ते सततं द्विजैः इति। पुनरपि श्रुतिवचनं स्मृत्वा सः धर्मव्याधः उवाच यत् यथाविधि यथाश्रद्धं न प्रदुष्यति भक्षणात् भवति अमांसाशी एवमित्यपि श्रूयते श्रुतिरिति। ततः सः धर्मव्याधः स्पष्टरूपेण कोशिकं ब्राह्मणं प्रति उवाच यत् स्वधर्म इति कृत्वा तु अहं मांसविक्रयणं न त्यजामि, पुरा कृतमिति ज्ञात्वा जीवाम्येतेन कर्मणा, स्वधर्मं त्यजतः अधर्म इति दृश्यते, स्वकर्मनिरतो यस्तु धर्मः सः इति निश्चयः इति। कृषिं साध्विति मन्यन्ते तत्रापि हिंसा परा स्मृता। तेनोक्तं यत् सत्त्वैः सत्त्वानि जीवन्ति बहुधा, प्राणिनोऽन्योन्यभक्ष्याः, ज्ञानविज्ञानवन्तः उपविष्टाः शयानाश्च

जीवान् घ्नन्ति, इदं सर्वमाकाशं पृथिवी तथा जीवैः व्याप्तम् अविज्ञानाच्च जीवान् हिंसन्ति इति। धर्मव्याधः स्पष्टीकृत्य उवाच यत् अहिंसेति यदुक्तं हि पुरुषैर्विस्मितैः पुरा किन्तु लोकेऽस्मिन् के न हिंसन्ति जीवान्, बहु सञ्चिन्त्य अहं ब्रवीमि नास्ति कश्चिदहिंसकः, अहिंसायान्तु निरताः जितेन्द्रियाः हिंसां कुर्वन्ति, किन्तु तेषां हिंसा यत्नादल्पतरा भवेत्। सुतरां स्वधर्मः यदि प्राणिवधरूपं कर्म भवति, अर्थात् अहिंसायाः विपरीता हिंसा भवति तर्हि तदवश्यवमेव उचितकर्तव्यम् भवेत्। भगवता श्रीकृष्णेन उक्तं यत् "स्वधर्मे निधनं श्रेयः" इति न्यायात्।

महाभारतस्य शान्तिपर्वणि षड्विंशदधिकत्रिंशत्तमोऽध्यायात् चतुश्चत्वारिंशदधिकत्रिंशत्तमोऽध्यायं यावत् वर्णिते उपरिचरवसवोः वृत्तान्ते दृश्यते यत् पितुः शान्तनवोः मुखात् ज्ञातवानस्य पितामहस्य भीष्मस्य मुखात् उपरिचरवसवोः वृत्तान्तः ज्ञायते युधिष्ठिरेण। अस्मिन् वृत्तान्ते राजोपरिचरः नाम भुवः अधिपतिः बभूव। सः इन्द्रस्य मित्रं नारायणं प्रति भक्तः शेषान्नभुक् सत्यपरः सर्वभूतेष्वहिंसकः अर्थात् अहिंसाशीलः पवित्रः अकृपणः कामनाशून्यः अथच कर्मणि यज्ञादौ परिचित आसीत्। अनेन उपरिचरेण महान् अश्वमेधः यज्ञः आचरितः आसीत्। तस्य तस्मिन् यज्ञे सर्वाः भागाः वनस्थानजाताः आसन्। ततः यज्ञस्य समाप्तौ प्रजापालनरतः राजा उपरिचरः भगवद्भक्तः ब्रह्मशापात् स्वर्गात् परिभ्रष्टः भुत्वा भुवः विवरं विवेश। ततः नारायणपरः भूत्वा तस्यैव प्रसादेन सः राजा पुनरेवोत्थितश्च परां गतिमनुप्राप्तः। किन्तु किमर्थम् उपरिचरः परिभ्रष्टः अभवत् इति युधिष्टरस्य प्रश्नस्य उत्तरे पितामहः भीष्मः ऋषिणां वृहस्पत्यादीनाञ्च इन्द्रादीनां देवानाञ्च संवादरूपं प्राचीनं वृत्तान्तम् उल्लिखति। तत्र संवादे दृश्यते यत् कर्मणा अधिकभोगसम्भवात् इन्द्रः मर्त्यलोकं प्राप्य यजनाय दीक्षितः अभवत्। ततः तस्मिन् यज्ञे यज्ञीयपशोश्छेदनस्य समये उपस्थिते वृहस्पतिः यज्ञे पशून् परिवर्त्य यवस्य तण्डुलस्य वा सजलचूर्णस्य अनयने आदिदेश। ततः तच्छ्रुत्वा पशुमांसभोजनलोलुपाः देवताः अवदन् यत् अजेन यष्टव्यं, छागोऽपि अजः ज्ञेयः नान्यः पशुरिति। फलतः यज्ञे ऋषिणां देवानां च मध्ये विवादवशात् कर्तव्यनिर्णये संशयः जातः। ततः संशयस्य मीमांसाय उपरिचरस्य आह्वानं जातम्। ततः उपरिचरः ऋषिणां देवानाम् उभयोः मतं श्रुत्वा देवपक्षावलम्बनेन अब्रवीत् छागेनाजेन यष्टव्यम्। ततः उपरिचरं प्रति कुपिताः ऋषयः अवदन् यत् देवपक्षावलम्बनज्ञानात् भवान् आकाशात् पत, अद्यप्रभृतिः उपरिचरस्य आकाशे गतिः विहता इति। अतः उपरिचरः परिभ्रष्टः अभवत्। सुतराम् अस्मात् वृत्तान्तात् स्पष्टीकृतं भवति यत् शास्त्रोपदिष्टयोः अहिंसाहिंसयोः परस्परविरुद्धयोः कर्तव्ययोः कदाचिद् एकस्यामेव परिस्थितौ उपस्थित्या कर्त्रा किं तावत् करणीयं किं वा अकरणीयमिति विषये संशयः जायते। तस्यां परिस्थितौ अखण्डचैतन्ये स्थिरबुद्धिसम्पन्नः आत्मानात्माज्ञानवान् भगवद्भक्तः भूत्वा शास्त्रोपदिष्टस्य एकस्य कर्तव्यस्य आचरणं विना कोऽपि उपायः नास्ति। लोकसंग्रहार्थम् उचितकरणीयकर्तव्यस्य निर्णयं कृत्वा तत्कर्तव्यपालनाय अखण्डचैतन्ये स्थिरबुद्धिसम्पन्नः आत्मानात्मविवेकवान् भगवद्भक्तः भवेत्।

दुष्टनिग्रहपूर्वकशिष्टपालनाय दण्डस्य प्रयोजनम् अस्ति। अतः दण्डः धर्मरक्षकः भवति। पुनरपि दण्डात् अहिंसायाः विपरीतायाः हिंसायाः आचरणं भवति। किन्तु धर्मरक्षार्थं दण्डस्य प्रयोजनं भवेत्। अतः दण्डात् हिंसायाः समर्थनाय शान्तिपर्वणः पञ्चदशाध्याये अर्जुनोऽपि उवाच यत् - प्राणस्यान्नमिदं सर्वं जङ्गमं स्थावरञ्च यदिति। पुनरपि स उवाच यत् -

सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित्।
पक्ष्मनोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः॥ इति।

**सिद्धान्तः**

आततायिनं प्रति, यज्ञार्थं, लोकहेतोः युद्धार्थं, दुष्टनिग्रहेण शिष्टपालनात् दण्डाय, स्वधर्मस्य पालनार्थम् अहिंसायाः विपरीता हिंसा स्वीक्रियते शास्त्रेण। तथापि सर्वाणि भूतानि प्रति अहिंसा अवश्यं कर्तव्यम् भवेत्। अविनाशिनि चिदाखण्डाधारे अर्थात् सत्यदृष्टौ अहिंसा एव परमः अर्थात् शाश्वतः सनातनः धर्मः। आचारदृष्टौ अहिंसाहिंसयोः परस्परयोः

विरोधयोः किंकर्तव्यतामूढात् अध्यात्मं मोक्षधर्मञ्च विना कोऽपि उपायः हि न विद्यते यथार्थरूपेण उचितकर्मणः पालनाय। अतः देशस्य तथा समाजस्य उन्नत्यर्थं सर्वदा कर्तव्यं कुर्यात्, यथार्थरूपेण च कर्तव्यस्य निर्णयार्थं पालनार्थञ्च आत्मानात्मविवेकवान् भवेत् जनः।

**सहायकग्रन्थसूची**


1. महाभारतम् -श्रीमन्महर्षिवेदव्यासेन प्रणीतम्, अनुवादकः-साहित्याचार्यः पण्डितः रामनारायणदत्तः शास्त्री, गीताप्रेसः गोरखपुरः।
2. महाभारतम् - महर्षि-श्रीकृष्णद्वैपायनवेदव्यास-प्रणीतम्, महामहोपाध्याय-भारताचार्य्य-महाकवि-पद्मभूषणेन श्रीमद्हरिदाससिद्धान्तवागीशभट्टाचार्य्येण प्रणीतया भारतकौमुदीसमाख्यया टीकया तत्कृत-वङ्गानुवादेन च सहितम्,विश्ववाणी प्रकाशनी कलिकाता
3. महाभारतम् - वेदव्यासेन विरचितम् , कालीप्रसन्नसिंहेन अनूदितम्, प्रकाशकः - शुभपतिः दत्तः, प्रथमं तुलि-कलमं संस्करणम्।
4. श्रीमद्भगवद्गीता - वेदव्यासेन विरचिता पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा परिष्कृता संस्कृता च, द्वितीयावृत्तिः, मुम्बापुर्यां पाण्डुरङ्गः जावजी इत्येतैर्निर्णयसागराख्यमुद्रणयन्त्रालयाधिपतिभिः स्वीयेऽङ्कनालये संमुद्य प्रकाशिता, शाकः १८५८ ख्रीष्टाव्दः १९३६